Ramachandraya Mangalam

Rama · Sanskrit

रामचन्द्राय जनकराजजामनोहराय, मामकाभीष्टदाय महितमङ्गलम् (१)

कोसलेशाय मन्दहासदासपोषणाय, वासवादिविनुतसद्वराय मङ्गलम् (२)

चारुकुङ्कुमोपेत चन्दनादिचर्चिताय, हारकटकशोभिताय भूरिमङ्गलम् (३)

ललितरत्नकुण्डलाय तुलसीवनमालिकाय, जलदसदृशदेहाय चारुमङ्गलम् (४)

देवकीसुपुत्राय देवदेवोत्तमाय, भावजगुरुवराय भव्यमङ्गलम् (५)

पुण्डरीकाक्षाय पूर्णचन्द्राननाय, अण्डजातवाहनाय अतुलमङ्गलम् (६)

विमलरूपाय विविधवेदान्तवेद्याय, समुखचित्तकामिकाय शुभ्रमङ्गलम् (७)

रामदासाय मृदुलहृदयकमलवासाय, स्वामिभद्रगिरिवराय सर्वमङ्गलम् (८)